शं तत्र न गोश्वात्रितिनिषेधेनास्या ग्रहणेः नवैवमपि दध्यग्न्यामित्यादौ अस्य सावकाशत्वेन द
धीच इत्यादौ परत्वात् नुम्सरोऽवरिइति वाच्यं शास्त्रपरिग्रहार्थो सर्वनामस्थानग्रहणसामर्थ्या

तत्रापिप्रहतेः नचवाहाहैवयुक्तेत्यादौ सावकाशमिदं अनिगन्तः पूर्वं पदं वाविति अस्याप्रहतेर्बध्यमाणत्वात्
५२ ल·शे· तत्रानिगन्तेऽञ्चतावित्यस्यैवेष्टत्वादिति वाच्यं अनिगन्तेऽञ्चतावितिपूर्वपदप्रकृतिस्वरस्यस·
53 ति शिष्टस्वरबाधकत्वेन तत्रैतदप्रहतेरित्याहुः केचित्तत्रान्तोदात्तादित्यपि वर्त्तते अग्रेः
ग्रहतिदर्शनेनात्रापि तत्संबन्धात् एवञ्चान्तोदात्तोत्तरपदभूताञ्चतेः परेत्यर्थः अत एव यरावे
त्यादावपरावेत्यादावप्रहतेः अनिगन्तेऽञ्चतावितिपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वात् अ
ञ्चेरन्तोदात्तत्वसामर्थ्याद्धि भक्त्युत्पत्तिकालावच्छिन्नेऽग्राह्यमित्याहुः तुङिदं अत्रैकावश्त्ति अ·
न्तोदात्तादिति वर्त्तते तत्रैकावग्रहणमसहेन विशेषणमव्यभिचारात् तद्घटितसमुदायस्य विशे
षणत्वेपि नत्वतिः अस्मिन्हि प्रश्लोह पाह्नेतद्घटितोऽर्थवान् समुदायस्तु हिति एवं पदाद्यंशे
पि उपात्तानामेव विशेषणेन विभक्त्यादिसप्रकृतेः अत एव ब्राह्मणायदेत्यादावन्तोदात्तत्वसि
द्धिः इदमेव ध्वनयितुं हत्यादिष्ट तत्रेत्यनुदाहृत्य प्रश्लोहइत्युदाहृतं नव सावेकावश्त्यनेन सिद्धा

नान्तोदात्तं शास्त्रिनद्याम्नेः एकाचइति किं अन्येरैनान्कनामाभिरित्यादौ एवानित्यस्य सर्वानुदात्त
त्वं यथास्यात् यद्यपि ग्रामादिश्च इति सूत्रस्य भाष्यादन्तोदात्तीयादिग्रहणं मन्त्रवर्जनइति ग्रन्तीयेनेतथा
पिन दे कंदश्च युक्तिः तत्रैव भाष्ये इतरथा अन्येन त्वहतत्रकेः अपोया वामित्रं सः पुत्रान्तरायोदेवी इतः
पिशाङ्ग यज्ञसे इत्यादिलक्षविसंवादात् अन्तोदात्ता किं अन्वादेशे ग्राम्यामित्यादौ एवनम्माभूत्
सावेकाचइति तु नात्र सावेषितिरूपात् प्रष्ठोहइति प्रष्ठवाट्शब्दे उपपदसमासे नान्तोदात्तं उत्थ्यु
पयेति उपधाभूतस्यैवोठो ग्रहणमित्यर्थः पञ्चमीनिर्देशादनन्तरस्यैव ग्रहणे प्राप्ते वचनेस्वरविधौ
व्यञ्जनमविद्यमानवदिति परिभाषात् अन्तोदात्तानुदात्तादिव्यवहारे एव प्रवर्तते अत एव क
र्षात्त्वतइति मतुप्निर्देशः अस्वरितार्थंइति प्रागेव निरूपितं अन्त्यस्वेति अत्राक्विपिविवदितेउ
न्तदातोनिपात्यते नतोयाणिउपपदसमासे कृत्स्वरेणान्तोदात्तो यं क्विपि परतउहित्वं अनुनासि
कादेः प्रत्यये उत्स्वरः सतिशिष्टः स्यात् तथाचस्यानशब्दो ऽन्तोदात्तो न स्यात् उदात्तनिपातने

५४ ल॰ शे॰
54

वेदमेव भाष्ये प्रमाणं अतएव प्रयोगे हृउ उदात्तश्रुतिः अन्यथा स्वरितः स्यादित्याहुः प्रतिवभ्रू इति मा
श्राभ्यामिति व्येदः बभ्रुशब्दे नोक्तयोरिदमापरामर्षोदन्वादेशोऽस्मिन्कथितानुकथनस्यैव तत्तात्
षट्पदादय इति सूत्रोपात्ताः षडित्यर्थः तेन वार्तिकस्यानाङ्ग्रहणेपि न दोषः एकाच इमनुहस्यैत॰
दर्थं लाभः तेनास्मिन् उदनीत्यादिमध्योदात्तमेव पदाद्यादेशाश्चान्तोदात्तानिपात्यन्ते इदं सूत्रं लिती
त्यस्य पूर्वविप्रतिषेधेनानुहृस्यावाबाधकं तेन इत इत्यत्र विभक्त्युदात्तमेवेति प्राग्दिशा इति सू
भाष्यकैयटयोः स्थितं इदमोर्हिंलि लित्सामर्थ्याल्लित्स्वर एवेत्याहुः अष्टनो अष्टन्शब्दो वृ
त्तादित्वादन्तोदात्त इति षट्संज्ञासूत्रे भाष्ये ध्वनितं तेनोत्तरार्थेन यानुवर्तमानस्यापि अन्तोदात्ता
दित्यस्यानबाधः अतएवाष्टाविंशत्येकादेशा उदात्तेनेत्यन्तोदात्तत्वसिद्धिः अल्पयोन्नमामित्यस्या
पवादोयमिति स्पष्टं दीर्घात् किं अष्टाभिः अल्पयोन्नमिति स्वरः प्रातरन्नमो अनुम इति त्यड्ढ
व्रीहिः प्रातर्लम्भार्देयात केति नवान्नस्त्रः तादेकादेशो हृतेऽव्ययवर्गः अन्तरङ्गपरिभाषाया॰

अनित्यत्वात् नचैकादेशस्वरोऽस्मिन्स्वरे सिद्धः अनुम इति प्रतिषेधेनासिद्धत्वाभावज्ञाप
नात् नह्येकादेशस्वरेण विनास्यानुमकमन्तोदात्तः भवति अनुम इति वचनत्वाच्छतरे
व विशेषणं तेन मुञ्चसत्यादौ स्वरप्रवृत्तिः अन्तोदात्तादिति तु तदन्तस्यैव विशेषणं अन्यथा
तुदती इत्यत्र न स्यात् अत एव नुम्प्रतिषेधः सार्थकः अत्र वार्त्तिके बृहन्महतोरुपसंख्या
नमिति बृहती महती यद्यपि शतृवद्भावेनेदं सिद्धं तथापि बृहन्महतोरेवेति नियमार्थमिदं
तेन पृषता पृषतीत्यादौ नोन न तु प्रियमहतेत्यादौ मृत्वेणासिद्धेर्विधानार्थमेव स्यादिति
चेन्न वार्त्तिकेऽप्यन्तोदात्तादित्यस्य संबन्धेनात्र तस्याप्रवृत्तेः अतिमहती इत्यत्र अतेरकृ
त्पदे इत्यन्तोदात्तत्वाज्ञायमेव विदुषी विदुष इत्यादौ वसोः स्थानिवत्त्वेन शतृत्वानतः
परयोर्नदीविभक्त्योरुदात्तः प्राप्तः स्वरे च सादेशे स्थानिवत्त्वप्रतिषेधान्न भवति उदात्तयणो
उदात्तस्वरितयोरित्यस्यापवादः हल्पूर्वात् किं वधूनि तत्त्वा ब्राह्मण्या वहोऽनड्वदिति व

ड्उ ब्रीहिरन्तोदात्तः अत्रोदात्तस्वरितयोरिति विभक्तिः स्वरितात्र उदात्तस्थानिकनकाराद्वेति
वक्तव्यं वाक्पतीनत्पुरुषः पत्यावैश्वर्ये इति ग्रामस्य पूर्वपदप्रकृतिस्वरस्य नभूवाक्विद्दिधिषिवेति
निषेधे समासस्यान्तोदात्तः नोङ्‌ध्या ग्रामादय इति अत्र सर्वे नामस्थानोपलक्षणं नदीग्रहण
मसम्भवान्नानुवर्तिते स्तम्भे इति कुडन्तरपदप्रकृतिस्वरेण स्तम्भ उदात्तः ह्रस्वनुड्भ्यां अत्र मत
पुग्रहणेऽस्मतुपो ग्रहणे नेति चावितिसूत्रे भाष्यस्पष्टं अग्निमांइति आपोदीयन्तेऽस्मिन्नि
त्यधिकरणे किः उदन्निरक्षुन्यत्रोऽवृत्तादन्तोदात्तः मतुप उदात्तत्वे पूर्वस्य शेषनिघातः
नव सन्निपातपरिभाषया दोषः स्वरे तदप्रवृत्तेः कृन्मेजन्तसूत्रभाष्ये उक्तत्वात् अत एव
न्तइति बिभ्रन्दस्यापि दध्यतइत्यत्र नडुदात्तः मतुपो अनोनुट् पूर्वस्य लोपः नुटोऽसिद्धत्वान्माड
पथायाइति वर्त्तं इक्षुमानिति इक्षुराद्युदात्तः ह्रस्वेति किं प्रजावान् ह्रस्वान्तादिति किं म
रुत्वानिति मरुग्रोरुत्निः मरुत् नच स्वरविधौ व्यञ्जनस्याविद्यमानत्वेन ह्रस्वान्तत्वे स्वरोद

घपके विधावेव नन्वहहनेरन्तोदात्तत्वोदात्तात्परत्वादिष्टवद्भावस्यैव तेन न लाभात्‌ अत एव कर्षात्व
त इति सूत्रे मतुपूर्वग्रहणार्थं अन्यथा दायः पाकहन्यादावपि विजनस्याविद्यमानवत्त्वेनाका
रान्तात्परत्वेनैव सिद्धे नद्धे यच्छंस्पष्टमेव अत एवात्र ग्रुद्रह एऽज्वरितार्थत्वं अत एव स्वरेण लोपा
सिद्धत्ववचनं सार्थकं अन्यथा सिद्ध नेत्येतत्परिभाषया नस्याविद्यमानवत्त्वे तद्धे यच्छंस्प
ष्टमेव अत एव हल्‌स्वरप्राप्ताविति परिभाषान्तरं स्वरविधाय कार्ये भाष्ये पठितं नस्यास्त
प्रकृते विषय एव नास्ति अत्र नुड्यन्तोदात्तात्पर एव तेन हनरोमन्‌ शाह्‌ः शिरसः शीर्षन्ना
देशोन्तोदात्तो निपात्यते अत एव शीर्षण्वानित्यादौ भवत्येवैतत्‌ रेशाह्वा ह्वेति वा निकमे
तत्रेवानिति रयिरस्याप्तीतिमतुपूरये मं तौ बहुलमिति संप्रसारणं पूर्वत्वं आडुणः रे
शाह्वान्मतुपा वत्तमिष्यते ह्रस्वाभावाद्धवनेन्द्रेप्रतिषेधो वाच्यः त्रिवतीनामान्य ह्रस्वेति म
तुवि ति वर्तते तत्र व्याख्यानान्मतुपा ह्रस्वो विशेष्यते प्रथमान्तमपि मतुप्पदं सप्तम्या विप

रिणाम्पतेन तदाह मतुपीति अत एवाग्नीनामित्यादावेतत्स्यहतिः अन्यथा परत्वान्नित्यत्वाच्च दीर्घे ह्रस्वाभावा
५८ 50 ल.श्री. न्नस्यात् वचनन्तिसृणामित्यादौ चरितार्थञ्च तन्नसृणामिति तत्तदाह मतुपीति अत एवाग्नीनामित्यादा
वेतत्स्यहतिः अन्यथा परत्वान्नित्यत्वान्नावकाशः तस्याद्युदात्तत्वात् सुमतीनामिति सुमतीशब्दो
बहुव्रीहिर्नञ्सुभ्यामित्यन्तोदात्तः यदे स्वरितान्ते सन्नुड्ग्रहणं किन्त्वेवांगन्तोदात्तात् किं च नसृणाम्
ङ्याश्छन्दसि अन्यतरस्यामित्यनुवर्तमाने बहुलं लौकिकेऽन्तोदात्तादित्यस्य निवृत्त्यर्थे निवृत्तिकृत्
बहुलग्रहणरहितपाठेऽपि अत्रान्तोदात्तादित्यस्य निवृत्तिर्व्याख्यानात् बोध्या तदाह वेत्युक्ते
रिति जयन्तीनामिति आद्युदात्तमेतत् षट्त्रि हलादिः किं चतस्रः पञ्चपात्रिपत्रीन्यच्छेपत्या
दि अत्र यद्वक्तव्यं तदुत्तरः शासीत्यत्रोक्तं न गोश्वन् सौत्रत्वाद्द्वन्द्वः सप्तम्यलुक् च एभ्य इति विभक्तेः
मेतत्पञ्चैत्यर्थः अन्तविस्यस्य विभक्तिरित्यस्यैवानुवृत्तेः एतद्वावाविति सूत्रे भाष्यकैयटयोः
स्पष्टं प्रागुक्तमिति षाष्ठिकस्वरस्येत्यर्थः तेनानुदात्तौ सुप्पितावित्यस्य न बाधः एतच्चानन्तर

सेमित्यापत्त्यर्थं नचैतन्न्यायानुसरणे षट्त्रीत्यस्यैव बाधः स्यादिति वाच्यं गवादिषु तदसम्भवात्
एवञ्च वीरवतमामित्यत्र हृस्वनुड्भ्यामिति न भवति देवीकुमारीत्यादावन्तोदात्तत्वनिहतिस्वरे
णैतत्रान्तोदात्तत्वं एतत्तृतीयादिविभक्तेरुदात्तत्वं नेत्यंतत्तत्रैव विहितत्वमेवान्ति नत्व लक्ष्यवि
रोधात् एतेन किंचित्स्वराणामपि बाधः स्यात् तथा च किन्तु इति सूत्रे ग्रामादिक इत्युदाहर
णापरहति विरोध इत्यपास्तम् अनुदात्तं पदमित्यस्य तत्परिभाषात्वाद्विभक्त्यादिस्वरता भावा
न्न बाधः उडिदमित्यस्य न निषेधः पदादेरेशाहृस्वग्रहणे वैयर्थ्यापत्तेः गवां शतेति सावे
कावत्तिप्राप्तिः न चैवं सप्तमी बहुवचने सावेकाच इत्यप्रसङ्ग इति न ततः परेषां विभक्तिः नच स्या
न्निवन्नावः गोः श्वर्वेन एतानास्वरेषु इति वार्तिके न स्वरे कर्तव्ये निषेधे वागोशाब्दादेशस्य स्था
निवत्त्व निषेधयोरुभयोरप्यप्राप्तेः अनत एव सुगुपालइत्यत्र गोनन्तियत्वे पालइति स्वरो न
एतेन सुगुनाबहुगुनेति निहतिकारोक्तमपि परास्तम् एवञ्च सुगुने त्यादौ निषेधाभावे अन्तोदा

५७ ल·शे· 57

ताडन्तरपदादितिभवत्येवेत्यस्वेरुदाहरणान्तरमाह गोमत्यइति अनाश्रित्यैपमिति अत्रचिदिति
संहितापाठेवाङ्गलकाव्ध्वनः शेपशाद्वस्यमध्येप्रदीप्यतेपदाकालेत्तध्वनः शेपाच्चिदिति
संध्यतेशेपपुच्छलाङ्गूलेष्वित्यलुकवनस्पत्यादिताडभयपदप्रकृतिस्वरः सौनलोपस्या·
सिद्धत्वात् ध्वनितिरूपएकदेशाविकृतस्यायेनततः परविभक्तिरितिसावेकाचइतिप्राप्तिः
प्रथमैकवचनेइतिनतत्तसावेकाचइतिवत्तस्यापोग्रहणंयत्नदोः स्त्रियामवर्णान्तत्वेपिलि
ङ्गान्तरेदकारान्तत्वात् व्याख्यानाद्वेतिभावः तत्रसावित्यवर्णान्तविशेषणंसौयदवर्णा
न्तदृष्टंतस्मादित्यर्थः सावेकाचइतिवत्तरूपविवक्षातत्रनव्याख्यानात् एतेनतेभ्यइ
त्यत्रसौयदवर्णान्तंरूपंततःपरताभावात्कथमत्रतिषेधप्राप्तिरितिपरास्तंसौयदवर्णा
न्तदृष्टंततोनवर्णान्तादपिसिद्धेः नन्वेवमपिअन्यग्रहणार्थंप्याइतिप्रथमैकवचनेऽवर्णान्त
त्वात्इतिचेन्ननलोपस्यासिद्धत्वेनादोषत्वात् अतएवज्ञापकात्स्वरादिनिषेधेपिनलोपासिद्धत

प्रहृत्तिः अत एव पितृमानित्यादौ मतुप उदात्तत्वं भवत्येव नैवैवं नपुंसकप्रथमैकवचनेनेतदित्या
दौ त्यदाद्यत्वाभावेन तेभ्यः कुलेभ्य इत्यादौ निषेधेन स्यात् न चैवमाप्यत्तिः यत्तदोश्च ग्रहणं कर्त्त
व्यमिति भाष्यमनेन न त्यादेरिति वाच्ये सोयस्य शाहस्य कापि त्यवर्णान्तत्वं दृष्टेन ततः परविभक्तेः
सर्वत्र निषेध इत्यर्थात् वस्तुतस्त्वत्रापि हृपविवक्षाऽस्त्येव परन्तु तादृशाहृपात्परत्वेविभ
क्त्यादीनान्तदुत्पत्तिकालावच्छिन्नं ग्राह्यं अत एव चाविति सूत्रस्य भाष्यविरोधो न तत्र हि
वेन स्यानित्यत्रास्य प्राप्तिः शङ्किता अत एव कुमारीत्यादावुदात्तनिवृत्तिस्वरनिषेधशङ्काप
रविप्रतिषेधसूत्रासिद्धवत्सूत्रस्य भाष्यविरोधोपि न वीरवत्तमं वीराणामित्याद्युदाहरणं
यत्तदर्थं भाष्यकृता षवनमेवारब्धं अत एव केभ्यः काभ्य इत्यादौ न निषेध इति भाष्योक्तमेव
रमणीये राट् राजा परमराजा अडि. त्यज्वतिः क्विन्नन्तोऽत्र मनकारो गृह्यते यमनलोपो
नास्ति तत्रैव प्रतिषेधो यथा स्यादित्यर्थं प्राज्वा प्रत्यज्वा अस्याधे सावेका.. व इति प्राप्तिः प्राज्ञूशाह्

स्थानिगन्तेऽवन्तावितिसर्वपदप्रकृतिस्वरेणाद्युदात्तस्तदेकादेशोऽप्युदात्तएवयदित्यत्रापि ग
५८ ल.शे. 58 न्तेऽज्वतावितिसतिशिष्टेऽविभक्तिस्वरस्यापिबाधकं तदात्मेवोदाहरणं गतौन्तु लुप्तनकार
त्वाद्विभक्त्युदात्तः स्यादेव वस्त्वतस्थावितिसूत्रस्यभाष्यप्रामाण्यपादत्रलुप्तनकारस्यापिग्रहणं
प्रतीचोबाहूनित्यादित्वव्यान्दसं कुङ्। किंनन्त्वएवकृदितिकरोतिः कृन्तर्निर्वा क्विबन्तः दिवो
सुल् सुभिरिति॥ऊडिदमितिप्राप्तस्यनिषेधः नऊदिव्याहः फिट्स्वरेणान्तोदात्तः वकार
स्यानिकऊकारः हल्स्यानिकत्वात् अनुदात्तः अस्वरको वा सर्वथाप्यंतोदात्तत्वाभावात्कृ
थमैमत्रप्राप्तिरितिचेत्रदिवउदित्यत्रोदात्तऊकारो निपात्यत इत्यदोषात् नचोदात्तनिपात
नसामर्थ्याद्विभक्तिस्वराग्रहणौ दिवोझलितिवर्थमितिवाच्यं अहर्विमलद्युइत्यादौ अन्तर
ङ्गःप्रकृतिस्वरस्यसतिशिष्टतयाबाधेनचारितार्थ्यात् दिवेदिवइतिअत्रोऽडिदमित्येवभवति
न्वेवान्य सावेकाचइत्यस्यापवादोयं अत्रझलीत्यनुवर्तितं तत्फलन्तत्रानेनरि अत्रह्यपि

यद्रूपं तदिति स्थानिवद्भावेन ततः परत्वात् सावेकाच इत्यस्य प्राप्तिः इदं च नामन्यतरस्यामिति सूत्रे
भाष्ये स्पष्टं वैदिकं चित्रीत्याद्युदात्तं पठ्यमानन्तु छान्दसत्वाद्बोध्यं एतेन झलीति नानुवर्त्तनेयम्
क इन्द्र यं पासीत्यत्र नरीत्याद्युदात्तस्य दर्शनादित्यपास्तं लोके नरीत्यन्तोदात्तस्यैवेष्टत्वात् न च यो
गविभागसामर्थ्येन विकल्पे लब्धेऽन्यतरस्याङ्ग्रहणेन व्यवस्थितविभाषात्वबोधनात् इष्ट
सिद्धिरिति वाच्यम् झलीत्यस्यासम्बन्धे योगविभागस्य प्रासिनित्योदात्तत्वविधायकत्वप्रा
ङ्काऽवारणार्थत्वेनान्यतरस्याङ्ग्रहणस्य चरितार्थत्वात् भाष्यानुक्तव्यवस्थितविभाषाया
अप्रामाणिकत्वाच्च तित्स्वरितं कर्षात्वत इत्यतोऽन्त इति वर्त्तते अभित्यप्रत्ययान्तः स्वरितः स्यादि
त्यर्थः कृन्त्वनेति किं कर्त्तव्यम् अतः किं न्यव्यनः पर्यायेण यन्नौ स्वरितौ माभूतां कृत उत्त उदेहि
दिव उत् इडङ्ग्नौ श्रीदित्यादौ तित्प्रत्ययग्रहणेन न दोषः तास्यनुदात्तेत् तास्यादीनां समा
हारद्वन्द्वः अत्रोपदेशग्रहणं सम्भवव्यभिचाराभ्यां ङिद्ग्रामेव सम्बध्यते न तु तास्यनुदात्ते

५९ ल.कौ.
59

द्धो उपदिश्यतइत्युपदेशः ङिदितिकर्मधारयः इत्संज्ञकङकारेणचोपदिश्यमानस्यविशे·
षणात्तदन्तविधिः तेनङिदन्ताकारान्तोपदिश्यमानादित्यर्थः अडुपदेशादित्यस्ययथाश्रुत
त्वेहिहतोहयइत्यत्रापिस्यात्कर्त्तेतिलुट् आत्मनेपदप्रथमस्यडारौरसः तासिः एकवचने
उदात्तनिवृत्तिस्वरेपिइतरयोः फलेविशेषः ङितइतिअस्याप्युपदेशाविशेषत्वान्नेहस्यात्ए
तेजयित्वेहद्वे अत्रस्मरतिदेशेनङित् नन्वनुबन्धानामनेकान्तत्वात्कथंज्वादिङोपिङिद
न्तत्वमितिचेन्न अनुबन्धेष्वेकान्तपक्षस्यैवन्याय्यत्वात् किंचविशेषणसामर्थ्याद्भविष्यति
वनस्यतिमितिचनो ऽन्यत्तदात्मनइच्छन्तमित्यर्थेक्यच् ---- लोट्प्रथमस्यलेशप्रसवपित
शितैर्वैशिष्ट्येनाकारोपदेशएवतात्पर्यात् अकारान्तोपदिश्यमानोभवत्येवचिन्त्वरोपी
तिपरत्वादितिभावः वर्धमानमितिमुक्तञ्अकारभक्तत्वाद्यद्वागमाइतिन्यायेनतत्स्यव
वयायकइतिनदोषः नचवर्णग्रहणेनदप्रहतिः अकारान्तोपदिश्यमानादित्यर्थेनेहव

णेग्रहणाभावात् यद्वक्ष्यमाणे इत्यादावपि अवयवावयवस्य समुदायावयवत्वात् नमुकस्यस्य
अवयवायक इति बोध्यं नन्वुपचूर्ण्णिइति स्थिते आयन्नादिष्वुपदेशिवद्भाववादनौ शपि लसार्वधातु
कानुदात्तत्वं बाधित्वा नित्यत्वादन्तरङ्गत्वाद्वा ऽनो गुणे इति कृते अपवर्गाभावादेतत्स्वराप्राप्तिः
अन्तवद्भावस्तु भयत्र आश्रयेणानिषिद्धः तत्र ग्रहणावपि अपवर्गस्य तेनानतिदेशात् उपचत इ
त्यादौ सावकाशत्वाद्भूतपूर्वगतिर्न युज्यत इति चेन्न ग्राह्यापत्तेः पचन्ति ते ह्रषमानित्यादौ आद्युदा
त्तत्वन्तु छान्दसत्वादित्याहुः स्वरभिन्नस्य प्राप्यानन्तिष्यतमुभयोरपि पूर्वं परो भयापेक्षत्वेन
नान्तरङ्गत्वे पञ्चमीसमासे ऽचः परस्मिन्निति स्थानिवद्भावे न अपवर्गस्य सुलभत्वाच्चेत्यन्ये
पचाव इत्यादौ दीर्घे कृते पि उपदेशग्रहणादिदं प्रवर्तते पचेदित्यादावपि शपः परस्य यासुट्
सहितस्य सार्वधातुकस्यानुदात्तत्वं भवत्येव यासुट उदात्तत्वन्तु आशीर्लिङि चिनुयादित्या
दौ च सावकाशं अड्उपदेशादिति न परकरणात् क्रीणातीत्यादौ लसार्वधातुकानुदात्तत्वेन

५ ल·शे· 60

प्रत्ययाप्रत्यया प्रत्यययोरिति परिभाषया नेह जहि प्रातुमान्निके पञ्नत परिभाषा प्रहत्तयेषवा कारान्तो
पदिश्यमानादिति व्याख्याने अन्यथा वर्णग्रहणे सानप्रवर्तेन त्वान्दसो वा वाधस्यपस्तत्र नन्वा स्ले इत्यादौ·
लते शपेष्टहीता ऽ उपदेशादिति लसार्वधातुकानुदात्तत्वं सिद्धमिति यथर्थमनुदात्तेङिः ङ्ग्रहणमिति वे
न्न लुग्भे विकरणमादा यास्य प्रहत्ति ज्ञापनार्थं नन्तस्मात् तेनान इत्यादिश्चन्तोदात्ते सिद्धे प्रसङ्गः किं
विड्व्यते हणद्वीत्यादौ श्रमिकृतेन नम्ध्यपत्तितन्मायेन विशिष्टस्य यातत्वाद्धातस्वरेणान्तोदात्तत्वमि
ति येन विधिरिति सूत्रभाष्ये स्पष्टं अमो मितेन परश्चेति परतस्य त्राप्रहत्तौ तत्स त्रियोगशिष्टाद्युदात्त
तस्यापि तत्राप्रहत्तिरिति शेषनिघाते न तस्यानुदात्तत्वप्रामे सति शिष्टो यातु स्वरस्तत्रैष्टव्य इति तदा
शयः नचैवं हन्ह्व इत्यत्र पूर्वोक्तरीत्या श्रम उदात्तत्वे वर्ज्यमानस्वरेणान्तसो ऽनुदात्तत्वं स्यादिति वाच्यं
सतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इत्युक्तेर्दोषात् न तत्र तिश्चनुदात्तोपदेशोतिन
लोपे कृते हन्तिरदन्तो न न नूपदेशो निङ्गानाइति मित्रशाह्वाश्वामध्यनोश्वान श्रामुगभाव ष्ठानन्दसत्वा

देशेनतास्यादिभ्यः परत्वाभावादिदं चिन्त्यमित्यपास्तं दीयमान इत्यपि प्रत्युदाहरणं न च सति शि
ष्टस्यानुस्वरस्य बाधायापत्तिः विकरणस्वरो लसार्वधातुकस्वरमेव न बाधते इतरसार्वधातुकस्व
रं मेवं तु बाधेतैवेति वाच्यं आत्ममाने खश्चेति सूत्रे सार्वधातुकस्वरमात्रबाधकत्वस्यैव भा
ष्ये व्यवस्थापितत्वादिति दिक् विदान्विपभ्यो लिङ्‌ लङ्‌ उदात्तत्वप्रतिषिद्धे इत्यत्रीते त्यादौ प्र
त्ययाद्युदात्तत्वेन बाधवस्यानुदात्तस्य उदात्ते दिति सूत्रभाष्ये विदीन्धि खिदिभ्यः परस्यानुदात्तत्व
भवतीत्यर्थो लभ्यते तत्कथं निषेधयारभ्यत इत्यत आह यत्तत्रेति एवञ्च तत्रत्यभाष्यविरोधात्प्रक्र
त सूत्रस्य भाष्ये प्रौढिवाद इति भावः आदिः सिचो प्रत्ययस्वरापवादोयं परत्वात्स्थितं इत्येते बाध
ते वा सिष्टमिति पदे चिन्तनं इति मध्योदात्तं एवं माहिकार्ष्टामित्यादौ एतदभावे प्रत्ययस्वरेणान्तो
दात्तं तं सिच् स्थितेनाद्युदात्तं पदमिति परिभाषालब्धागमानुदात्तत्वबाधेपि सार्वधातुकप्रत्ययाद्यु
दात्तत्वस्य बाधे मानाभावात् विकरणस्वरस्य सार्वधातुकस्वराबाधकत्वाच्चेत्याहुः अनिटः

परस्यापितउपसंख्यानंमाहिकार्षेयदेश्रायुदात्तेनवमाहिकार्षीदित्यत्रापिईट: पिङ्क्तस्यास्वेयेर: प्रा
८। ल॰शे॰ प्नोतिईट: पूर्वमन्तरङ्गत्वात्स्वरेकृतेतन्नईटिलक्षेलक्षणस्येतिन्यायेनपुनरप्रवृत्ते: अतएवात्रभा
ष्येमाहिकार्षमित्येवोदाहृतं भाष्योदाहरणस्योपलक्षणत्वाल्लक्ष्यभेदेनन्यायाप्रवृत्तेश्चशेषनि
घातविषयाभावाच्चमवत्येवतत्रापिस्वरइत्यन्येथ्यलिवसेटीडं अत्रावइतिवर्ततेइतिभाष्येस्पष्टंअ
जन्तेभ्योविहितोयस्यल्सेटन्तदन्तेपदेइट अन्तआदिश्चउदात्तोवास्त्वित्यर्थ: यदोलिस्वर:
आदिर्णमुलीत्यतोन्यतरस्यामित्यनुवर्तमानेवाग्रहणंकार्यविकल्पार्थंसदादेरपिकार्यंप्रा॰
पयतीत्याह आदिर्वेति अन्यतरस्यामित्यनुवृत्ते: फलमाह यदेतिपर्यायेणेति ननुयुग
पत् अन्तश्चेतवैइत्यादौयुगपद्ग्रहणाल्लिङ्गात्पर्यालिकिंलुलुवत: सेटीतिकिंयथायइट्ग्रह
णान्तुपदेडागमस्तदात्तस्योदात्तार्थस्यात् ननुम्पयथालुलविथेत्यादौवत्तर्णोपपिथेत्यादौत्रया
णामेवमिडभावेपिस्यात् सेड्ग्रहणान्तुसेडेवभवतिएवञ्चपपाथेत्यत्रालित्स्वरएवअजन्तेभ्य :

किंविभेदिर्यपपिथेस्मादौपरत्वादात्तोलोपेऽजन्तात्पशेनास्तीतिविहितइत्युक्तं उपोत्तमंरिति
प्रत्ययस्वरापवादोयं आहवनीयेबाहुलकादधिकरणेऽनीयः प्रीणनार्थात्कर्मणिवातत्तो
गतिसमासेकृदुत्तरपदप्रकृतिस्वरः इतिप्रत्ययस्वरः समासस्य यत्ताश्रियमिति षष्ठीतत्पुरु
षः श्रीशब्देकारस्योदात्तत्वेआन्तरतम्यादियङ्‌प्युदात्तः हलस्वरप्राप्तौव्यंजनमविद्यमानव
द्भावात्‌राजदन्तादित्वात्‌दोषकाराकारउदात्तः पर्यायेणनानापदानांस्वरेप्राप्तेऽयमारम्भ
उदात्तस्वरितग्रहणमनुवर्तमानेतद्धितिवर्त्तते पूर्वपदसामानाधिकरण्यात्‌ एवञ्चपूर्वं
पदस्यप्रकृतिभावस्तत्स्ययोरुदात्तस्वरितयोः प्रकृतिभावद्वारेणेतिभावः यद्वापूर्वपदश
ब्दोवर्त्ततेइदङ्क्रगतीत्यत्रकैयटेस्पष्टं चित्रश्रवइतिश्रवः कीर्त्तिः चित्रश्रवोयस्येतिचित्रश्रवास्त
पं.श्री. तत्समपूर्वबहुव्रीहावितिकिराजपुरुषः पूर्वसूत्रेन्तस्समपादइत्यत्रउदात्तस्वरितानुक्रमपूर्वपद
केसावकाशसमपादइति समशब्दस्वान्तसमसमितिमेत्यनुष्वानीत्यनुदात्तः हरदत्तस्तुसंज्ञाऽयम

बित्याह पादशाह्नोहषादित्वादाद्युदात्तः नन्वत्रास्मिन्स्वरे सत्यपि समासान्तोदात्तत्वं भविष्य
६२ ल॰शे॰ ति प्रियविश्वइत्यादौ तन्न एकपदे द्वयोरुदात्तयोरसमावेशात्सोक्तत्वेनासम्भवादिति चेन्न सत्यपि
सम्भवे बाधनं भवतीत्यङ्गीकारादर्दोषः अन्यथोदात्तस्वरितयोः समावेशाभावेत्तापकाभा
वान्मनुष्यनाथ इत्यत्रोभयोः समावेशः स्यादित्याहुः तत्पुरुषे तुल्यश्वेत इति तुल्यशाह्नो
यदन्तस्याद्युदात्तः मन्दयत्सखामिति मन्देर्णिपन्तात्लटः शत्रादेशः तस्य छान्दसत्वादार्यधा
यातुकत्वेन शवभावादडुपदेशादिति निघाताभावे प्रत्ययाद्युदात्तत्वमेव णिलोपस्तु नतं प्र
ति सार्वधातुकत्वाश्रयणात् छन्दसि दृष्टानुविधानान्नैवैपरीत्यं शङ्क्यं इत्थं मदयच्छह्नोन्
तोदात्तः ततस्तत्पुरुषे तुल्यश्वेत इति तुल्यशाह्नो यदन्तस्याद्युदात्तः मन्दयत्सखामिति मन्दे
र्णिपन्तात्लटः शत्रादेशः तस्य छान्दसत्वादार्यधातुकत्वेन शवभावादडुपदेशादिति निघाता
भावे प्रत्ययाद्युदात्तत्वमेव णिलोपस्तु नतं प्रति सार्वधातुकत्वाश्रयणात् छन्दसि दृष्टानु

वियानान्नवैपरीत्येपशाङ्कंन्द्रइत्येमदयव्वंहोन्तोदात्तः ततसत्त्वन्तुरुषेटव्यपिव्वान्द सत्वादेवात्रवित्स्व
राभावः नन्तुपरमेकारकंपश्यपरमेणाकारकेइत्यर्थेसमासेऽतिप्रसङ्गः द्वितीयान्तनीयासम
स्यन्तपूर्वपदत्वात् नहिविशेषणसमासः प्रथमान्तानामेवेतिनियमोऽस्तीतिचेन्नलक्षणप्र
तिपदोक्तपरिभाषयाद्वितीयादिशब्दोच्चारणेनविहितसमासस्यैवग्रहणात् शस्त्रीतिगो
रादिङीषन्तः अव्ययेनञ्कुक् निपातनादेवसिद्धेनञ्ग्रहणमकरणेऽरित्यादौपरस्यापिकृत्स्व
रस्यबाधनार्थंअव्ययीभावसतिशिष्टप्रत्ययस्वरबाधनार्थमित्येकेभाष्येतेनदर्थवचनान्यथा
ख्यातिअन्तोदात्तपदमितिसूत्रेकुग्रहणज्ञ्वादिषुपाठाभावात् केचित्तुचादिष्वेवकुः पा
ठ्यः इहतुनपाठ्यः एवञ्चाव्ययत्वमपितस्यसिध्यतीत्याहुः स्त्रीत्वेति अत्रसमासान्तोदात्त
त्वमेव नचमयूरव्यंसकादिष्वेवास्यान्तोदात्तत्वंनिपात्यतांकिमनेनेतिवाच्यंसामिकृतस्मय
न्योतमित्यादिवारणायपरिगणनस्यावश्यकत्वादितिकैयटादयः भाष्यकृतात्वन्तोदा

६३ ल॰ शे॰ 63

त्तनिपातनमाश्रित्यपरिगणनेप्रत्याख्यानेतस्यायंभावः सामिकृतेस्वयन्यौतमित्यादौपरिगणन
वादिनापिदासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वमिष्यतएवेतिमहत्त्वेसर्वमितिकालाध्वनोरि
तिद्वितीयाकष्टश्रितादौग्रहीतेद्वितीयेतिभावेवनानीतइत्यादौथाथादिस्वरःग्रामगमी
त्यादौणिनिस्वरः खट्वारूढेहट्टादीनाज्ञेति तस्मान्महत्त्वेसर्वादीत्येवोदाहरणमिति॰
भावः भोज्योष्णमितिकृत्यतुल्येतिसमासः कृत्याशेलक्षणप्रतिपदोक्तपरिभाषानप्रवर्
त्ततेइतिकश्चित् कृत्सासारङ्गः इतिकृत्सालोहितेवर्णेनान्तणेत्याद्युदात्तावेदेत
कृत्सास्पामृगाख्यावेदितिकृत्स्नान्तोदात्तः अत्रसूत्रेएकेवर्णग्रहणंसर्वथैववर्णोवर्णे॰
नेतिप्रतिपदोक्तसमासग्रहणादित्याह अरित्रगायमिति अरित्रैर्नौकाष्ठैनस्तगा
यन्तेनस्पृश्यमानन्तलमित्यर्थः षष्ठीसमासात्वनेनपुनरायामप्येवेतिसवतियंहू
धीयैरेवेतसन्मात्रदायाद्यं दीयतेसदायोंशः तमादत्तेदायादः तस्यभावोदायाद्यं॰

दायादानन्तेसंबन्धोवाप्रकृतेतल्लक्षणायादायायशब्दश्चादीयमानेदायेप्रवर्त्ततेयस्माद्दायादमर्हे
तीत्यर्थेदण्डादित्वाद्यत् सर्वोपास्थितत्वात् पूर्वपदार्थभूतोदायएवेतिबोध्यं यतस्स्वदाया
दइतिस्वामीश्वरेतिसंबंधसामान्यषष्ठ्यन्तेनसमासः परमदायादइति अत्रसमासान्तो
दात्ततमेवगमनविरामितिविशेषणसमासः ल्युडन्तस्यभाववाचित्वात् चिरकृच्छ्रयोः
कालकष्टवाचित्वेऽपिप्रकृतेचिरकालभाविनिकृच्छ्रयोगिनिचार्थेचिरकृच्छ्रयोःपूर्वनिपा
प्राप्नोतीत्यतोमयूरव्यंसकादिसमासोऽत्रेत्याहुःषष्ठीसमासइत्यन्येप्रतिबंधिजायतइति
कार्यसिद्धेःप्रतिबन्धकेजायतइत्यर्थः प्रतिबन्धिशब्दश्चावश्यकेणिनिः मूत्रकृच्छ्रमि
तिषष्ठीसमासोऽयंमूत्रपदेनेतिमूत्रामिषेणेत्यर्थः उच्चारः पुरीषक्रियायजन्तइति
मूत्रशब्दः सिविमस्थ्याष्टन्त्वेतिष्टन् प्रत्ययान्तइत्यन्येनिवातेइतिवाताभावोनिवा
तेनिरुद्धोवातोयस्मिन्नितिवाकुटीनिवातामितिआद्येकुत्सादिहन्तकेऽर्थेवर्तमानाः

५८ ल॰शे॰

64

कुत्साद्यो निवातशब्देन समानाधिकरणः अनेन सहमेतत् राजनिवात इति राजपार्श्वे इ
त्यर्थः षष्ठीसमासोऽयं रज्जुपाणवदमिति कर्मधारयः रज्जुशब्दो रज्जुबद्धपाषाणो हूनेव नेते इत्था
नीमेव रूपाणरूढेन वज्जलमित्यर्थः आगुदात्त इति हजेरस्तम् सलोपश्चेत्यत्र उर्निदित्यधि
कारात् उत्तमश्शरदमिति शरदि भवमित्यर्थः कषायत्वं इति कर्मधारयो यज्जरण विशे
षेरूढः दौवारिककषायमिति रूढिशब्दोऽयं कषायोऽहं चादिः माटरूपवाचिनि तत्पुरु
षे इत्यर्थः पितृशब्दोऽन्तोदात्तः तृजन्तत्वात् तृतीयासमासे तत्पुरुषे तुल्यार्थे सने
नैव सिद्धे इदं दस्याः मटशा इत्यलुक् समासार्थे पितृसटपा इत्यादौ षष्ठीसमासस्त्वन
भिधानान्नेत्यपि वक्तव्यं वज्जदासीशब्दस्यान्तोदात्तत्वोदात्तयण इति विभक्तिरु
दात्ता इत्यादि पूर्वं मटशात्यत्र निरूपितेन माटरूपमिति यत्र हि प्रतियोगि विशेषसमं
येणार्थे पूर्वे पदे तत्रैवेदमिति माटरूपग्रहणसामर्थ्याद् दासीपन इति भावः पेरूमसमस

मद्र इति तत्पपाठः वाणिज इति वणिगेव वाणिजः प्रज्ञादित्वादण् स सप्तमीसमास इति इदं मद्रवा
णिजः इत्यत्र मद्रेषु गत्वा व्यवहरतीत्यर्थः नन्वेवं सप्तमीपूर्वपदप्रकृतिस्वरेणैव सिद्धे गत्वग्रह
णमत्र व्यर्थमिति वाच्यं सत्पूर्वपदेति लब्धस्य समासस्य प्रतिपदोक्तत्वाभावादिति मात्रशब्दो ह
न्त षष्ठीसमासार्थमावश्यकस्य परत्वात्तत्रापि प्रवृत्तिरित्याशयः इत्यन्ये मात्रोपज्ञो नपुंसके
इति नपुंसकवाचिनि तत्पुरुषे इत्यर्थः तुल्यप्रमाणमिति मात्रशब्दो हन्ति विषये तुल्यप्रमा
णे वर्त्तते इति भावः अस्वपदविग्रहः षष्ठीतत्पुरुषः सुखप्रिययोर्हिते यदापत्याप्रीतिकरं
न हितं गमनस्सुखमित्यादिकं मेथारयः गमनस्य विशेषणत्वात् सर्वं निपातः सप्तसुखं सका
दित्वाद्वाप्रीतौ च सुखप्रिययोः प्रीत्यव्यभिचारादिति शब्दे उत्तरपदे पूर्वपदं तथेत्यर्थः गृहप
तिरिति गेहे क इति कप्रत्ययान्तो गृहशब्दोऽन्तोदात्तः दमे इति गृहे इत्यर्थः येषां क्षयं किंहषः
लीपतिर्विग्रहः नञ् इत्यर्थः नक्षवा सुवेसमाहारद्वन्द्वः भूपतिरित्यादयः षष्ठीतत्पुरुषाः अ

न्तोदात्ताः अन्यत्र प्रत्ययान्तः वा भवनं पत्यौ ऐश्वर्ये इति आत्मने विकल्पो यं आमितात्यवसाय इति त
६५ ल॰शे॰ द्विपर्योत्कटकोटिकस्थानमित्यर्थः गमनमाशङ्कनात इति संभावने इत्यनेनान्वेति विशेष
65 णसमासाः सर्वे लित्स्वरः पूर्वे भूतपूर्वे भूतपूर्वार्थे पूर्वशब्दे उत्तरपदे इत्यर्थः आढ्यपूर्वः
आङ्पूर्वो ध्यायतेः पृषोदरादित्वात् ढ्यः आढ्यशब्दस्याद्यादिस्वरेणान्तोदात्तः विशेषणस
मासः सविधसनी सामीप्यार्थेष्वेतेषूत्तरपदेष्वित्यर्थः सविधादयः समीपे रूढाः मद्रो
दगन्तोन्तोदात्तः गान्धारिः कर्दमादीनां चेत्याद्युदात्तो मध्योदात्तो वा कश्मीरोलयावन्त
इति मध्योदात्तः सविधादिषु किं मद्रसमीपे विस्पष्टादीनि गुणवचनेषु परेषु विस्पष्टादी
नि प्रकृत्येत्यर्थः अत्र विस्पष्टादीनि प्रवृत्तिनिमित्तस्य विशेषणानि न द्रव्यस्य कटुकादिशब्दैर्गु
णवद्द्रव्यमभिधीयत इति सामानाधिकरण्याभावात् कर्मधारयाभावेपि मयूरव्यंसकादि
त्वात्समासः न त्र विस्पष्टे गतिस्वरः विचित्रे ऽव्ययस्वरः विचित्रेत बहुव्रीहिस्वरो व्यक्तो गतिस्वरे

एणाद्युदात्तः संपन्नोऽन्तोदात्तः पङ्क्तिर्निपातादाद्युदात्तः पण्डितकुशलावन्तोदात्तौ वयसि तु एणवध्वेवं अजा
वम अत्र अज्यकनाम्नोरयदन्तसमभिव्याहारमर्थान्तरतोऽग्रहणं वदन्ति तत्पापेनैव संबध्यते एव
ज्येऽज्यकन् इत्यादेशावति अवमशब्दे पापशब्दवत् तिवोत्तरपदे इति पाठः पाठान्तरन्तु आमादि 2
के ममन अश्रेष्ठमित्यादौ मध्यस्वरेषु सकादित्वाद्विशेषणस्य परनिपातो राजदन्तादित्वाद्धा गमनपा
पिष्ठमिति पापवत्कुष्ठादिष्ठन् विन्यतोऽर्लंक अन्यथा पापशब्दस्य गुणोपसर्जनद्रव्यवाचित्वा
भावात् ततः सन स्यादिति बोध्यं कुमारश्च कुमारशब्दः पूर्वपदे तथा कर्मधारये इत्यर्थः अत्र
कुमारः श्रमणादिभिरिति समासस्यैव ग्रहणं प्रतिपदोक्तत्वादिति केचित् अन्ये तु सर्वकर्म
धारयग्रहणं पवज्जकुमारब्राह्मण इत्यादावपि प्रवर्तन इत्याहुः ततमीश्वरोवेद आदिः प्रत्ये
न आदिरिति षष्ठ्यर्थे प्रथमा कुमारशब्दः प्रकृतिस्वरेण यत्स्वरकः प्रागः सस्वरः आदेरिति
सूत्रार्थः फलितमाह कुमारस्यादिरिति पते नोदात्ताधिकाराभावादिदमसङ्गतमित्यपास्ते

55
66

ल॰श्रो॰

पूगेष्व पूगोगणस्तद्दाविन्नत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो वेत्यर्थः कुमारश्चेत्येवेति
प्रतिपदोक्तग्रहणपदेन समासान्तोदात्तत्वे बाधे पश्चाद् वन्निवितितद्धितार्थे द्विगुः प्रमाणेलोद्वि
गोर्नित्यमिति मात्रचो लोपः पञ्चारत्नयः स्यादौ श्रुन्तरङ्गत्वात्पूर्वं स्वरः पश्चाद्विभक्तिनिमित्तका
र्ये अकृतव्यूहपरिभाषा तु नास्ति अनित्यावेत्स सकृदाद्वेदिते किं चस्यानिवर्तनेन निमित्तवि
नाशाभावान्तत्त्वे पिनदोषः लोपाजादेशास्वितेन निषेधात् कालवाचकानां ग्रहणेन
दाहदशमासस्य इत्यादि पञ्चकपाल इत्यादि पञ्चसु कपालेषु भगालेषु संस्कृत इत्यर्थे द्विगोः
लुगनपत्य इति लुक् पञ्चसुशरावेषु संस्कृत इति तत्राहृतमित्यणो लुक् पञ्चाश्व इति पञ्चभि
रश्वैः क्रीत इत्यर्थे द्वैतिकोलुक बहुल्य इत्यन्तेन प्राप्तेविभाषेयस्सरितियारिति भवतीति पदे
नोदात्तत्वे बोध्यं पञ्च वितास्तिरितिमात्रचो लुक् द्वयसचोवा अकालादिति पञ्चमीप्रय
मार्थे एपन्त इति तेनान्तोदात्त इत्यर्थः क्रुत्स्वरेणेति कृन्निमित्तके नेत्यर्थः तथा व्याख्या ५

दिसूत्रेण बाधित इति फलितं त्रयाणां क्रान्तत्वात् बन्यस्यैव जन्तत्वात् परिप्रश्नया इत्यत्र आर
भ्यपञ्च सूत्राणि द्वन्द्वाव्ययीभावविषयाणि परित्रिगर्तमिति अत्र अपपर्योरपपरी वर्जन इति
कर्मप्रवचनीयत्वात् तद्योगे पञ्चमी अपपरिबहिरव्ययीभावः प्रतिपूर्वो ह्रामिति लक्षणेना
भिप्रतीति समासः उपपूर्वैति अव्ययं विभक्तीति समासः वर्ज्यमानावधित्वात्तयोरिति अनेनाप
थगुदाह्रियन्त इति भावः अग्निं प्रतीति इति विग्रहे प्रत्यग्नि शलभाः पतन्तीत्यादौ मा भूदित्यर्थः
क्वचित्तु नथैव पाठः लक्षणयाशिनितावरोधेन राजन्यग्रहणमिति अन्यक इत्सीनो राजन्या
त्वाभिवारादित्यर्थः संख्या अत्र पूर्वसूत्राद् ह्व इति वर्तते अयसादेशा आ पुदात इति त्रयोदश
चमे इत्यादावापुदात्तपाठादिति भावः क्वचित्तु ... इति पाठो दृश्यते तदा
त्रयोदशा चमे इत्यादौ क्वान्दसत्वं बोध्यं आचार्योपि सूत्रे षष्ठीबहुवचनस्थाने प्रथमैकवच
ने पाणिनीयशैक्षीया इति पाणिने शैक्षा इत्यर्थः तत्प्रोक्तमधीयत इत्यर्थो वा पार

णिनेगौत्रेजन्तनामाभावाङ्गोध्वानश्चवइतिनिषेधाद्वेत्यस्मिन्नेतेनतेनवृद्धाच्छः आचार्योपसर्जना
९७ लशे. न्तेवासिग्रहणं द्वन्द्वविशेषणमिति नतुसर्वपदविशेषणंव्याख्यानादितिभावः तत्फलमाह
67 सकलइतिछांदसेतिछन्दसोधीयतइत्याद्यर्थः द्वन्द्वे किं आपिशलप्रियः पाणिनीय आपि
शलपाणिनीः कार्तकौजपादिगणेविभक्त्यन्तपाठोवचनविवक्षार्थः कुरुभूमिः तत्रजाताः कु
जाः तानुपातिकुजपः कृतस्यकुजपस्यवापत्यमित्यर्थेऽऋष्यण तावेतौ कार्तकौजपौ साव
र्णिमाण्डूकेयौ अत्रवन्यस्मकाः पैलश्यामकर्णेयाः अत्रबहुवचनमविवक्षितमितिवृत्तिकृ
त्कपिश्यामकर्णेयाः केचित्तुपैलस्यापर्णेयाइतिपठन्ति शैतिकाक्षपाञ्चालेयाः अत्रापिब
हुत्वमविवक्षितंकटुककवार्चलेयाः वार्चलेयाइत्यन्येपठन्ति शाकलशुनकाः शाकलशण
काः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अवि
मत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौ

पुमलौकान्ताः स्त्रीकुमारैमौदपिप्पलादाः अस्माद्धिः पादः पंक्तौ समासान्तोदात्तत्वाय वत्सज
रन्तः सौश्रुतपार्थिवाः जरामृत्युयाज्यानुवाकेहन् द्वन्द्वलक्षस्य हन्तावेष तत्पुरुष इति ना
न्तर्वर्तितत्पदस्त्वाव्ययीभावायसमस्येपि हन्तत्पुरुषस्यापारणानीमानि सुकृतैवैतत् अस्य
प्यातत्पुरुषप्रकरणमध्येपरिप्रत्युपापेतिपञ्चम्यन्तेनकृतास्यात् परंतु बहुधातत्पुरुषाप
वैष्टुदाहरणमिति बोध्यं द्वन्द्वलके त्यादीकर्मधारयेपाउष्ट्रसादीकर्मधारयः षष्ठीसमासोवा
गोसाद इति सदेर्यजन्तेनणपन्तादणन्तेनवासमासः तस्मादेवाणिनौगोसादीगोडसीद
तीतिगाः सादयतीतिवाविग्रहः इणजादिभ्य इणन्तः सादिरत्र टच्च त इत्यन्ये कुरुगार्ह
एषांसमानामिति षण्णामितिकाविकोऽपपादः मनोरमाविरोधात् समापिभिन्नानिप
दानि आययोः षष्ठ्याः सौत्रोलुक् इतरेषांपञ्चानांषष्ठ्याः स्थानेप्रथमैकवचनंदासीभारा
णामितिबहुवचनादायथोर्वगातिरितिभावः उप्रत्ययान्त इति तथावान्तोदात्त इति भावः केचि

६८ ल·शे·
68

न्नतत्रानिदिष्टस्तुवर्न्नेयन्तिनत्र इगन्तानाञ्चषामित्यनेनकुरैपपर्यायेणोभयोरप्युदाननस्त्रीका
रेणफलाभावादित्याहः हलिरित्येवं मूलेन प्रत्ययस्वरमात्रमुक्तेरिक्तगुर्वादयः कर्मधारयाः
अहृतोनञ्समासस्याप्युदाहः अश्लीलेत्यादि अश्लीलावासौहृद्धहृपावलावण्यरहिता
पि दृढहृपाकुञ्जतादिरहितत्वात्सस्थानमात्रेण शोभनेत्यर्थः निपातनादिति पारेवड
वेवेत्यर्थः पारेमध्ये इत्यव्ययीभावस्तेन सूत्रे दीर्घनिर्देशात् बडवायाः परासम्भवात्
चतितिलिन इतितिलाः सन्त्यस्यातितिली पृषोदरादित्वात्तिशाहस्याहितेञ्चपस्येन स्नाहितर
तिटिलोपः छात्रार्थेसब्रह्मचारीत्यादिवचनेनटिलोपः पण्यकम्बलः कर्मधारयः बहु
लग्रहणात्समासइत्युक्तेः समासप्रकरणेगुणपशाह्रीयदन्ततादाप्युदाहः केचित्तु नन्नु द्वि
तीयाकृत्याइत्येवसिद्धमितिचेन्नलोपः पण्यकम्बलः कर्मधारयः बहुलग्रहणात्स·
मासइत्युक्तेः समासप्रकरणेगुणपशाह्रीयदन्ततादाप्युदाहः केचित्तु नन्नु द्वितीयाकृत्या

रस्येवसिद्धमितिचेन्नप्रतिपदोक्तकृत्तुल्याख्याइतिसमासेएवतत्प्रवृत्तेःइहतुविशेषणसमा
सः नन्वजात्येतिप्रतिषेधसामर्थ्याद्गुलेभोसाविमितिचेन्नअजात्येतिनजातिप्रतिषेधार्थंकिंतुन्या
यसिद्धार्थानुवादकंतत्फलन्तुगुणक्रियावाचिनामनियमेनपूर्वनिपातेप्राप्तेतन्नियमार्थंस्त
त्रमितिसुत्यादनेस्यइज्वदेहत्यादाविताज्ज्ञस्तव्रसरविधायकेकृत्तुल्याख्याइत्येवक्तके
कृत्तुल्यार्थयोर्वियोगपाठेनार्थपदघटितपाठेनार्थपदघटितपाठनदेशेपरिभाषायाः
अप्रवृत्तेरतएवप्रकृतसूत्रेकृत्प्रत्ययान्ततात्पूर्वपदप्रकृतिस्वरेसिद्धेपाणकम्बलःस
ज्ञायामेवपाणकम्बलएवेतिवानियमार्थमिदंविशेषणसमासइतिभाष्यकैयटयोरु
क्तेसंज्ञायामितिनियमार्थमिदन्तदाह अन्यत्रेति प्रतिपदोक्तइत्यादितद्धितप्रत्ययेनतेन
६९ सोपिनभवतीतितद्भावःदासाभारोदासीभारःयस्यतत्पुरुषस्येति केचित्तुयस्यसमास
स्येत्येवंवदन्ति यूपदार्वित्ति यूपस्याद्युदात्तःकृत्युम्याज्ञ्वेत्यत्रनिर्दिष्टत्वात्प्रकृतिविकृ

६९ ल॰शे॰
69

त्तिभावएवायंस्वरस्थं इत्यर्थेकेचित्तन्नयोगात्तस्मात् तेनकुबेरबलिरित्यत्रनतदर्थे किंगोस
त्विदेवार्थमिति देवायेदमितिविग्रहः तादर्थ्येएवचतुर्थीकेव प्रतिपदोक्तताहितरक्षिताभ्यां
समासस्यैवात्रग्रहणंज्ञापितंहितमित्यत्रहितयोगेचेतिचतुर्थीएवज्ञापकंरक्षितमित्यत्रतादर्थ्ये
चतुर्थीअन्यत्रहितपाठेनास्यप्रवृत्तिः अत्रापितदर्थेइत्यग्रहणे अतएवास्यसूत्रस्यप्रवृ
त्तिविकृतिभावएवचतुर्थीनतदर्थइत्यस्यग्रहणेज्ञापकताचचतुर्थीनतदर्थार्थेतिसूत्रभा
ष्योक्तासङ्गच्छतेतेनसूत्रेणतस्यप्रवृत्तिर्हितयोगेतादर्थ्याभावात् नचहितेचेतिवक्तव्या
केचेतिसामान्यसूत्रेरक्षितानामपिसञ्ज्ञापकमितिभाष्याशयः गुरुत्वादन्यार्थत्वस्याव
श्यकत्वाच्चेत्याहुः कर्मधारयेनिष्ठा अत्रप्रतिपदोक्तत्वाण्पादिसमासस्यैवग्रहणान्नेतन
वैदिकयाडितत्रसूत्रेनेदंमहान्व्रीहीतिसूत्रेभाष्येस्पष्टं कृताकृतमिति आकृतमिति
च्छेदः कृतापकृतादीनांच्वोपसंख्यानमितिप्रतिपदोक्तःसमासः अकृतमितिच्छेद

स्त्वेन युक्तः तस्य क्तान्तोत्तरपदत्वाभावेनाप्राप्तेः अहीनवाविनीति अविभागवाचिनी
त्यर्थः थाथादिस्वरापवादोयं अनुपसर्ग इतीति अनेनैवानीनाद्भ्याहन्तिसिद्धावहीनइति
वर्थमित्याहुः तृतीयाक अयमपिथाथादिस्वरापवादः त्तोतास इति त्वयाक्तताः रादि
त्ताः तेतासः प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशादकारलोपश्छान्दसः अवतेः
क्तः ज्वरत्वरेत्यूठूपधायनीति हिड्विडागमस्याभावश्छान्दसः पूर्वपदप्रकृतिस्वरेः
कृते एकादेशउदात्तेनोदात्तः ततः स्वरितः स्पष्ययाइति गत्यर्थाकर्मतिक्तः गतिरन
न्तरः गतिः क्तिजन्तः पुल्लिङ्गानन्तरपदसामानाधिकरण्यात् निपातनादत्त
नासिकलोपइतिहृदन्तः गतिशब्दस्य तत्सञ्ज्ञकशब्दपरत्वात्सामानाधिकरः
ण्यात्तुपपत्तिरितिकश्चित् पुरोहितमितिपुरः शब्दोऽक्तिप्रत्ययस्वरेणान्तोदात्तः था
थादिस्वरापवादोयं अस्युत्तरइति रहत्न शब्देन समासे पुरोहितामित्येवगति

७० ल.शे.
70

स्वरेणाप्युदात्तवद्भूतशब्दे तत्पुरुषान्तरमिति शब्देन समासः अयमेव समासक्रमो भाष्यादिस
म्मत इति प्रागेव निरूपितेन तत्र कद्ग्रहणपरिभाषयाउद्भूतस्यकान्तोत्तरपदत्वात् अथवा
दक्रमेण समासान्तोदात्तत्वेन तद्बाधकाव्ययपूर्वपदप्रकृतिस्वरेण तद्बाधकस्य भाष्यादिस्व
रे प्राप्तेऽतस्तत्र पाठाय प्राप्तः नन्वेन नञ्ग्रहणेऽप्यसौऽवारः कद्ग्रहणपरिभाषयोद्भूतस्यका
न्तत्वेऽभेत्तदात्तत्वर्थस्य सत्वादिति चेन्न अनञ्ग्रहणसामर्थ्याद्वियातोऽस्तनन्तरो
गतिराश्रीयतेऽभिस्वनतथेति न दोषः नन्वभेः स्वराभावेऽपि अभ्युद्भूतशब्दस्य भाष्या
दिस्वरेणान्तोदात्ततापत्तिः इष्यते तद्व्याहृस्य स्वरः संस्कृत्यन समये समाकृतमित्यादिम
न्त्रे समाकृतशब्दे आद्युदात्तस्वरदर्शनात् नवासौ प्रकृतसूत्रेण सिद्ध्यति प्रथमसमासे नत्वा
भावपि द्वितीयसमासे भाष्यादिस्वरस्य हलतेरुक्तत्वात् नवतस्त्वायितागतिस्वरः प्रवर्तते अ
भ्युद्भूतशब्दे उदः पूर्वपदत्वाभावादिति चेन्न यातोगत्यनन्तर इति व्याख्यानादेव योगविभागेना

नन्तरो गतिरपूर्वं पदमपि प्रकृत्येति व्याख्यानादेव वा पूर्वं पदं तेन विनाप्यस्य प्रवृत्तिस्वीकारात्
अन्यथा यथाथाते ऽप्रतिगतिरिति न तेऽप्रति पूर्वपदत्वासम्भवेन सूत्रार्थासङ्गतेः एवञ्चाभ्युद्धृतमित्यत्रो
दयवसरः इदमेवानन्तरग्रहणं कृद्ग्रहणपरिभाषाया ज्ञापकमित्यन्यत्र प्रपञ्चितं तेनैवव
मपि व्यवहितत्वारणेन यानोऽरनन्तर इति व्याख्यानस्य चारितार्थ्येन कथं सतिशिष्ट थाथा
दिस्वरबाधकत्वमिति चेन्न अहीने द्वितीयेति सूत्रादनुपसर्गग्रहणमत्रानुवर्तते तेनैनैव
अभ्युद्धृतमित्यादौ अभ्यादेर्व्यवहितसिद्धौ अनन्तरग्रहणात्कृदानन्तर्यामथाथादिस्वर
बाधः एवञ्चात्र तत्सामर्थ्यात्पूर्वपदमित्यपि न सम्बध्यते इत्याहुः कारकपूर्वस्य तिति
अयं भावः कारकाद्दत्तेति सूत्रे कारकादिति योगो विभज्यते क्तग्रहणं गतिग्रहणञ्चा
नुवर्तते कारकात्परं क्तान्तमगतिकमन्तरपदमन्तोदात्तं स्यादित्यर्थः एवञ्च दूराद्धूत
इत्यादौ थाथादिस्वरेण कृत्स्वरेण वा सिद्धे दिदं दूराद्धागतमभ्युद्धृतं न्यायेन प्रागगति

रनन्तर इत्यस्य सत्वाय नार्थमेतेनोक्तं रीत्याहृतादागत इत्यादौ कारकं पूर्वेऽपि गतिस्वरः स्या
७१ ल॰श्री॰ त् इष्यते तेऽप्याद्यादिस्वर इत्यपास्तम् मिति दिक् नादौ चानि ति कृत्स्वरापवादो यन्नकारादे
71 र्नित् प्रत्ययस्याकृतोऽभावात् गतिग्रहणेन याथौ नोद्देपेण नत्यकृतिक प्रत्ययस्यैव ग्र
हणात् स्वकृत्स्वाभेकृत्स्वाप्रहतिकाले यस्तद्ग्रहणार्थं नेन प्रलपितेत्यादि सिध्यति स्वरस्य
हतिवेलायामन्तादित्वाभावेऽपि पूर्वं नन्तस्तत्वात् यस्मिन्विधिरित्येव सिद्धेऽश्वादिग्रहणाद्वि
न्नप्रयोजनेऽत्र नन्तर इति अत्रापि पूर्वं स्वस्वरेव देव यव स्याबोध्याश्वागन्तरितिनन्वेतावि
तिपर्युदासः क्विन एवोचितः ह स्योवोदस्तस्तुतिमित्यादौ गतिस्वरादर्शनादिः
तिचेन्नतत्रोपापान्तरस्यैवानुसर्तव्यत्वात् न ह्यनन्ताविति पर्युदासेन तत्रिर्वाहः कृदु
त्तरप्रकृतिस्वरेणयातोरुदात्ततापत्तेः अन्तोदात्ततायाश्च तत्रेष्टत्वात् किं चानन्ता
विति क्विनः पर्युदासप्रभृतौ सङ्कृतिमित्यादौ गतिस्वरो न सिध्येत् तस्मात्तनएवा

यंपर्युदासः प्रत्ययमनिनन्क्किन्वाप्याख्यानेत्यादिनासुप्त्यादावन्तोदात्त मत्तमिति नत्र प्रभृता
वित्यादिसिद्धये फारकात्तु हृत्येन्योप्यस्तात् हृतिकृत्तादर्शितत्वाद्बहुव्रीहौ वोदस्व शङ्क्षा
मित्यादौ तु स्तोत्रकरणीभूतायाज्ञस्वः साधसिरित्यादिवत्कर्तृत्वेन विवक्षायाङ्किं जन्तः
तात्रदोषः तवपान्तः कृत्स्वरापवादः प्रत्ययउदात्तइति यथाप्रत्ययपदगण्डस्वेभन्तथा
पिगतिः प्रकृत्याभवतीत्युक्तेः उदात्तो वृद्धिमारोहतीति भावः ग्रनन्तादइति प्रत्ययापिप
र्वेवदेव व्यवस्था ग्रन्वेतनवाइति ग्रनुरुपसर्गत्वादप्युदात्तः प्रत्यंत्र्यमित्यादौ यणिग्रनि
गन्तत्वादनत्यहतिर्ङ्वीरानवस्थानिवत्तेश्च र्वेपदस्यकार्यित्वेनाश्चर्वेविधित्वात् ग्रनिग
न्तइतितुप्रतीवइत्येतद्याहृत्याववितार्थमितिवेन्नइगन्तस्ययणादेशेकृतेपिप्रतिषे धे
इतिवचनेनैवनिर्वाहात् एवञ्चप्रशाद्घइत्यादौकृदुत्तरपदप्रकृतिस्वरएवपरत्वादिति
त्तुस्वरावकाशः येपराञ्चः उभयप्रशाङ्केः परत्वादयमित्यर्थः वत्सान्तस्वरइत्यादित्यर्थः

एतेनास्मिन् समासेऽकृते विभक्त्यावचश्चिलोपेऽकृते सतिशिष्टत्वात्स्वर एव प्राप्नोतीत्यपास्तं·
७२ भाष्यकारेष्टैवपरिहारात् अत्रतु स्वरादिति सतिशिष्टस्वरमात्रोपलक्षणमिति केचित् उदा
ल·श्री· त्तस्वरितयोरिति स्वरसन्धेः पूर्वंप्रवृत्तोत्तरपदनिमित्तकार्यप्रवृत्तेः एवमेतस्मिन् स्वरे पक्षाय·
णिश्रस्यप्रवृत्तिः अथ उ· अत्रोदात्तादनुदात्तस्येति स्वरितः एवमधीवेत्यत्राप्ययमेव स्वरः
स्तुत्स्वरात्कृत्स्वरापवादाद्विभीयायोगोऽप्यद ईषदिति सर्वे पदत्वात्प्रकृत्येत्यर्थः यदेसमासा
न्तोदात्तः कृत्स्वर एवेति ईषद्गुण एव वनेनेति प्रतिपदोक्तसमासस्यैव ग्रहणादिति भावः
अत एव बहुव्रीहावपीदं न केचित्तु परत्वात्कृत्स्वर एवेत्यर्थं इत्याहुः बहुव्रीहावपीति तत्पुरु
षाधिकाराभावादिति भावः प्रथमोऽचिरो अविरोपसंपत्तिः अभिनवत्वेप्रथमो वैयाकर
ण इति वैयाकरणानामाद्यो मुख्य इत्यर्थः के समासेऽप्यमन्तोदात्त एवकृतनरकन्तमो उ
त्तर उत्तमयोर्ष्टित्वादन्तोदात्तौ प्रतिपदोक्तत्वादिति करतमो जातीति प्रतिपदोक्तस्यैव

ग्रहणादित्यर्थः कर्मधारयइत्येवेति तेनार्यब्राह्मणइत्यर्थेनदोषः राजब्राह्मणइत्यर्थेनदोषः
राजन्शब्दः पदेऽन्तोदात्तत्वेराजशब्दोब्राह्मणेनान्वयोऽनेनेति समानाधिकरणे षष्ठीसमा
सेऽन्तोदात्तत्वमेवयोगविभागोयथासप्तमि ... हुमर्थस्य अत्र लिङ्गविशिष्टपरिभाषानेति ऊड्याप्
सूत्रे भाष्ये स्पष्टं एवं समासरूपसमुदायश्च ... पि सान्तेन बहुव्रीहौ नञ्वदिति सूत्रे बहुगोमती
त्यत्र न अन्यत्र वेति कर्मधारयइत्यर्थः कौनिता नित्यमामीत्यपकाला इति असन्नसंयोगे वे
त्यस्याप्युपलक्षणमेतत् द्वितीयासमासइति द्वितीयाऽत्यन्तसंयोगे द्वितीयापूर्वपदप्रकृ
तिस्वरापवाद याथादिस्वरस्यापवादिकोऽपवादोये ग्रामः शिल्पिनि शिल्पिवाचिन्युत्तरपदे
इत्यर्थः ग्रामनापितइतिषष्ठीसमासः राजनापितइति कर्मधारये राजयोग्यपतयाश्रयि
कारोयमिति अन्तइत्यतः प्रागादिरिति प्रकृत्यामगालमित्यतः प्रागुदात्तइति वाधिकि
यतइत्यर्थः धर्म्यमिति धर्मोनामग्रामजनपदकुलेषु परंपरायातः सदाचारः तस्मादन

येनान्येन शाण्डेवायमभ्याचारवशादवश्यं कार्यमित्यर्थः देयमिति प्रकृते व्याख्यानलभ्यं हारि
७३ ल.शो. 73 ण्युदाहरणे याज्ञिकाश्व इति षष्ठीसमासाविमौ हारीत्यावश्यके णिनिः हृञो ऽत्र ग्रहणमर्थे :
वाडवहरणमिति हरणशब्दः कर्मसाधनः कृत्स्वरो हारिस्वरेणेति कृत्स्वरापवादानो भावक
मेव वचनमिति स्वरबाधे कृत्स्वरबाधस्यापि फलितत्वादिति भावः वित्स्वराद्धारिस्वरः परत्वात्
मान्तु लगवः दत्याश्वितन्त्र इति गावद्वत्यादौ चरितार्थं युक्ते च युक्तः समाहितः युक्तसमा
यावित्यस्य रूपं गोवल्लव इति निन्त्यरत यागवां पालक इत्यर्थः कृत्स्वरयाप्यादिस्वराबद्द
र्वविप्रतिषेधेन युक्ते चेति स्वर एवेष्यते गोहि इ गोसङ्ख्यः सामित्व इति कः विभाषाध्य
क्षे अध्यक्षशब्दो युक्तवाच्येवेति प्राप्तविभाषेयं पापञ्च शिल्पिनि शिल्पिवाचके परत इ
त्यर्थः गोत्रान्ते आद्ययोरर्थग्रहणं अन्त्ययोः शब्दग्रहणं अपत्याधिकारादन्यत्र लौकि
कगोत्रग्रहणादाह सञ्जुतो ऽपत्यस्येति माणवब्राह्मणयोर्गोत्रत्वेन प्रसिद्ध्यभावादुह

णें ओदनपाणिनीयाइति ओदनकामतेनेनतेषामुद्देशः अङ्गानिमैरेये सुरायाअतिरिक्तंमद्यंमैरेय
न्तद्भावकेउत्तरपदेतदर्थारम्भकवाचीनिपूर्वपदान्याद्युदात्तानीत्यर्थः आसवोनमद्यंभक्ता
ख्याः स्त भक्तशब्दोऽत्रअदनीयवस्तुमात्रपरः भिक्षाकंसादयः षष्ठीसमासाः बहुवचनात्स
रूपविधिनिरासेसिद्धेआख्याग्रहणंक्रियायविशेषस्यभिक्षादेर्ग्रहणार्थमित्याहुः क्रियामात्रमिति
नइत्यमित्यर्थः बहुव्रीहिरितिषष्ठीसमासेतन्नोदात्ततङ्गोविडाल उपमानार्थेषूत्तरप
देपूर्वपदमाद्युदात्तमित्यर्थः गवाकृतेस्तनियदेयत्रयथोपमानभावः संभवतितत्रता
प्यायोज्यमित्येवोक्तेगोखुरकैजी जीविकार्थेसमासेअकप्रत्ययान्तेउत्तरपदेपूर्वपदमा
द्युदात्तमित्यर्थः कात्स्वरापवादः दन्तलेखनादिजीविकायाः समासेप्रवृत्तिनिमित्तत्वा
त्समासस्यजीविकार्थत्वमित्याह यसेवेति प्रतिपदोक्तत्वात्रित्यंक्रीडेतिविहितसमास
एवेदंग्रहणमन्यस्यग्रहणार्थंप्राचामितिप्राग्देशवर्तिपुलालादाणकमित्याह प्राग्देशावा

७७
74 लं॰शा॰

र्निनामिति आजीविकार्थमिदं उद्दालकेत्यादौ नित्यं क्रीडेति समासः तत्पुरुषेति षष्ठीसमासः
निष्ठकरइति अपि हृतृज इत्यर्थः सपकास्मिन्निष्कर्तव्येन तत्परो न भवतीति गुरुके इत्यनेन न सिद्ध
ति शिल्पिनिव वुङ्के येस्तेव सिद्धे हृजः प्रतिषेधार्थं वचने सञ्ज्ञायां अत्राण्णिति शिल्पिनि
वा हृजः इति वर्तते अनुकार्थे मनिष्ठकार्थे हृजः प्रतिषेधार्थं च वचनं ज्ञोतन्ति पालश
हपरेषु तेष्वायुदात्त इत्यर्थः वत्सानो बध्यन रज्जुस्तानिः णिनि णिन्यन्ते उत्तरपदे पूर्व
मायुदात्तमित्यर्थः अत्र सञ्ज्ञाग्रहणमनुवर्तते इति सूत्रे भाष्यादौ तेनाश्राद्धभोजी
त्यादौ न अत्र हत्स्वरएव उत्तरसूत्रस्याभाष्यात् तेनानुवर्तते इति प्रतीयते तत्तेऽत्र षयोवि
डः वस्तुत उत्तरसूत्रेपि सञ्ज्ञायामित्यस्य संबन्धे येन कश्चिद्दोषः उपमाने शब्दार्थकथाव प्रकृ
तिके एव णिन्यन्ते परे इत्यर्थः उष्ट्रक्रोशीति उष्ट्र इव क्रोशतीत्यर्थे कर्तर्युपमान इति णि
णिनिः एवेति किं उपमानमेवेत्येवं नियमो मा भूत् न त्वावसाधव्याधीत्यादौ पूर्वेणापु

दात्तेनानस्मात् हृकवङ्गीमत्रवस्मादिति बोध्यं उकारो एते समासा एवंगणे पठ्यन्ते उका
रो हीति एषु गणे नीत्यैव सिद्धे उकारादीन्येवस्वे पदानि अकारो ह्यादीन्येवोत्तरपदानीत्येवं पूर्वपदो
त्तरपदनियमार्थमिदमितिकेचित् अस्सञ्ज्ञार्थमित्यन्ये ह्रीवहोनेति अत्र समासस्वरापवा
दे कृत्स्वरे प्राप्ते तदपवादे मन् क्तिन् इति प्राप्ते तदपवादोऽयं एकशितिपाद्वक्ष्योऽत्र पठ्यन्ते तत्रैकः
शितिः पादोऽस्येति त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषः न त्ववान्तरतत्पुरुषे समासान्तोदात्तत्वे
बाधितेऽनेनेति पूर्वपदप्रकृतिस्वरेऽणगुदात्तत्वे सिद्धे एकशब्दस्य कर्तव्ये न्तत्वादिति वेदन्त उत्तर
पदे शित्यन्तस्याद्विगुस्वराभावज्ञापनार्थत्वात् तेन द्विशितिपादिति शब्द एवोदात्तः नत्वेव
मपि समासान्तोदात्तत्वे बाधितात् बहुव्रीहिनिमित्तं पूर्वपदप्रकृतिस्वरत्वं भविष्यतीति अर्थ
एवं पाठ इति चेत् निमित्तस्वरबलीयस्त्वस्यापि ज्ञापनात् फलेन तु कर्मैवेति केचित् परे तु
समर्थसूत्रे एतत्कृत्पाठेनेहार्थः इगन्तो द्विगाविति सस्वाध्यकत्वात्र स्वरे दोषः स्वकः

न्नेन द्विशिति पादित्य त्रापि द्विशावृत्स्वरएवेति लभ्यते अत एव निमित्तिस्वरबलीयस्त्वे वाव
७५ ल॰शे॰ निकामिति कैयटेनोक्तं सति शिष्टस्वरस्य सिद्धमिति तन्मादित्याहुः पात्रेसमितादयो यत्र
75 बोध्याः छायिक शात वर्ष शाल्योप्यत्रपठनीय इति समर्थसूत्रे भाष्ये त्रय माकृतिगणः दी
र्घकाश दीर्घान्तकाशादीनि वर्जपरे आद्युदात्तानीत्यर्थः दीर्घादिति किं तुष्टिजः जे
किं शमी हृदः कृत्स्वरापवादोयं अन्त्यात्पूर्वं आमलकीजरत्यत्र दीर्घकाशोत्तापरत्वाद
युमेव स्वरः तद्भेदिति पूर्वपदञ्चेदित्यर्थः निवसत् निवासकर्तृसूत्रे बत्सेयेन बडवव
ने केचित्तु यिकरणिश्रोण्यादिकस्त्र चक्ते समासविशेषणमित्याहुः मल्लग्रामादीषष्ठी
समासः दाक्षिग्रामः दाक्षयो निवसन्त्यस्मिन्नत एव मन्यते वोषादि पक्षस्सर्वपदमाद्युदात्त
मित्यर्थः घोषाकठपल्वलहृदवदरी पिङ्गल पिशङ्ग माला रक्षा अश्वस्य शिल्पी
तृण शाल्मली श्रुति कूट दालि अश्वानिसन्तइत्यनुवर्तनं तस्येकेनानुवर्ततइत्यनेकेष्वा

आदयः ब्राति पैलि भाण्डि वाडि आपिशालि आवलिण्डि गौपि अयमेव स्वर इति स्पष्टत्वे
देहत्वौ भाष्येतनैतद्दूषयते शेषे मालादीनाञ्चेति सद्यारम्भात्कर्षादिपूर्वदासास्वाह अह
द्रमिति प्रस्तुदाहरणेऽन्तोदात्तत्वे कर्कोमत्रीमकरीरकुडकवलवदरपैङ्गोणेति शोणेत
ति पाठे पठ्ङ् प्रावान्देशे इति हठत्वे माला शाला शोण पैङ्गोणेति वा द्राक्षा लाक्षा काञ्ची
पका काम माला मान वामेमिति नवशब्दः प्रत्ययवाचीश्च कारान्तः महार्मस्मित्यत्राते हले प्रा
प्तिः नभ्म् मङ्गप्रमस्यानोश्मायइति जन्तोदत्वेणान्तत्वम् सक्षुतेति स्वरवियोनलोप
स्यासिद्धत्वेनाप्रमतोऽवर्णान्तताभावादप्रामेभोष्येऽनुक्तताबहुस्वकमिदेविन्त्येहत्रिशामा
एपादशमशाह्लोऽकारान्तोपपत्तीत्यत्रेदिवोदासायेति दिवस्वदासइति षष्ठ्याअलुक्सर्वे
ष्वेन इति श्वेतादिगुणेन सर्वावयवानोप्याप्तिरिति गुणकार्त्स्न्येह तिरश्चसर्वशाहाप्यत्रहिगु
णान्तराभावसत्वेपुरण स्यस्पृज्यमानार्थताभावात् पूर्वकालैकेत्येव समासः स्याश्रय

ल॰ शे॰ 76

वास्येति न तज्ज्वलत्वेनेत्यर्थः सर्वसौवर्ण इति विकारकार्त्स्न्यमत्र सर्वेषामिति गुणकार्त्स्न्ये हत्रिः
सर्वश्वेत्युत्रगुणान्तरेणेति समासः सर्वेषां पदानां मध्ये श्वेतगुणवद्रूपान्तरापेक्षया साति
शयश्वेतगुणवानयमित्यर्थः द्रव्यान्तराप्येयश्वेतापेक्षया सर्वेषां पदानामयं श्वेतो गुणः सा
तिशय इत्यर्थः इत्यत्र जनागिरिरिति वनगिर्योरिति दीर्घः गिरीत्यादि किं शरवणे हृतीव
णे कुमार्यां वयसि वयसि वर्तमाने पूर्वपदमित्यर्थः वृद्धकुमारीति विशेषणसमासः पुंव
त्कर्मधारयेति पुंवत् अस्ये प्रयोगमात्रेति नन्वात्रेण कुमारत्वरूपे ग्रहणनिमित्तमुपादा
यारोप्यप्रयुक्त इत्यर्थः अतएव कुमारीत्यत्र ङीप् सिद्धिर्वयसि इति वृद्धत्वमित्यर्थः न कु
मारत्वमेवेति यत्कुमारीशब्दस्य ग्रहणनिमित्ते न तदेव वयोऽव्यस्ति इत्यर्थः एवं व्वय
सीति पूर्वपदविशेषणमिति सन्निहिते स्वरेऽकृते इति नेन्द्रस्येति निषेधेन पूर्वोत्तरपदनिमित्तका
यीत्पूर्वमेकादेशाभावज्ञापनादिति भावः गार्गीत्रिरात्रमिति संख्यापूर्वं रात्रं क्लीबमिति।

क्लीबतायाँ ह्रस्विङ्गपाठश्च कार्त्तिकः ग्रामादिक एवं बिल्वसमराजमित्येव पाठः प्रतिपदोक्ते ति सभा
राजेति विहितेत्यर्थः प्रत्युदाहरणे बहुव्रीहिः ब्राह्मणकुले विशेष्ये पुरे प्रावां स्वनन्त्याकारान्त
पुरशब्दस्य सङ्क्लृप्तिरित्य प्रत्ययान्तस्य वग्रहणमविशेषात् अप्रत्ययान्तस्यापि परत्व सम्भवात्
न स्यत्रोत्तरपदाधिकारोऽस्मीत्याहः इहापीति अरिष्टगौडावित्येव सिद्धे पूर्वग्रहणं तदादिसमा
सग्रहणार्थमिति भावः अप्रागर्थं ज्वदेस्य वेहास्ति नपुरमिति एषु समासान्तोदात्तत्वमेव
ढगिति ढेलोपः इत्य लोपः कुसूलकूप प्रत्युदाहरणेषु समासान्तोदात्तत्वे दिक् शब्दाग्राम
चानराटेस्य रूपग्रहणे अन्यत्रार्थग्रहणे पूर्वैषिति एकादेशः स्वरितउदात्तो वा पूर्वपा
ज्वाला इति पञ्चालेकदेशो पञ्चालशब्दस्य हत्या पूर्वी दिनासामानाधिकरण्ये पूर्वापरे
ति विशेषणसमासः पायानमिति य याति मयि कृतमाख्यानमित्यर्थः पूर्वयायातमि
त्यादौ पूर्वशब्दस्यादिक् शब्दत्वाभावात् कथं प्रामि रित्यत आह शब्दग्रहणमिति यदाक

दाक्षिदिशि टच्प्रत्ययपर्यन्ताभादिति भावः आचार्योपसर्जेन श्चोगसमस्पर्थेप्रथमाश्चान्तेवासिवि
७० ल॰शे॰ 77 षो षणाज्ञैवेतत् उत्तरपदस्यत्यपीति सप्तज्ञेदं हलिषादेवू सत्रेभाषेहहलिमात्रस्योत्तरपदस्याभा
वेन सामर्थ्याद्धृष्टिमडुत्तरपदे लब्धे उत्तरपदग्रहणान्न स स्वरितत्वाद्वा तदधिकारलाभः
अस्य हलिशब्देन विहितहलिग्रहणेनापि वारयितुं शक्यतादाह सर्वकारकेति बहुव्रीहौ विश्वं
सञ्ज्ञायामिति बहुव्रीहेर्विश्वदेवा इत्यन्तोदात्तं विश्वदेव इत्यसञ्ज्ञायां पूर्वपदप्रकृतिस्वरः विश्व
मित्र विश्वाजिनयोः सञ्ज्ञायां मित्राजिनयोरिति तद्विप्रतिषेधेन ऋषौ विश्वामित्रेऽयमेव स्वरो
भवति ऋषिप्रतिषेधो मित्रे इति वचनात् हर्यश्व इति नेदं स्यपरस्येति ज्ञापकात्पूर्वं पूर्वोत्तर
पदनिमित्तकार्यमिति स्वरोत्तरं यणादिति नोदात्तस्वरितयोरित्यादि प्रवृत्तिः अत्रापि सञ्ज्ञाया
मित्यनुवर्तत इत्याहुः दोपे अदोपे सञ्ज्ञाताभावे पूर्वपदप्रकृतिस्वर एव चटोदर इति चटशब्दो
हर्षादित्वादाद्युदात्तः कटुकशब्दस्तु कन्नन्तत्वान्नथावलाचलस्याजन्तत्वाद्वलावलेषुरित्वदा

हरणे विन्नेपवं सहेषुरित्यपि अन्तुदरइत्यत्रैति होपेसज्ज्ञावेदं अदेवेपि पूर्वपदप्रकृतिस्वराप
वादन्तात्तदेवस्तूदरइत्यत्रनतोपिपरत्वाडुपसर्गात्स्वाङ्गमिति बोध्यं ब्रह्मशाहइतिन्तका विकोऽ
पपाठः गौरीशाहस्यङीषन्तत्वयान्तोदात्तत्वेन विशेषाभावात् अपैतशाहोगतिस्वरेणाद्युदात्त
प्रत्येवकशाहः कुण्डतरप्रकृतिस्वरेणालित्वान्मध्योदात्तः शुक्तशाहः सुकष्टशाविनाद्युदात्तः
उत्तरपदादिः उत्तरपदे इति लुप्तषष्ठीकं पृथक्पदं कर्णो वर्णा कर्ण इति षष्ठ्यर्थे प्रथमा उत्तरप
दस्य कर्णस्यादिरुदात्त इति वाक्यार्थः फलितमाह परः कर्ण इत्येवमग्रेऽपि बोध्यं अत्र लक्ष
णशब्देन पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रति रूपकं यत्कर्णादिषु चिह्नं क्रियते तदुच्य
ते इष्यवर्णग्रहणात् तेन स्थूलकर्ण इत्यत्र न स्थूलशब्दोऽन्तोदात्तः शङ्कुकर्ण इति कर्ण
लक्षणस्येति दीर्घत्वे श्वेतः पचाद्यजन्तः शोभनो सुजन्तः प्रत्युदाहरणे पूर्वपदप्रकृतिस्व
रः तत्र हयेतन्तोदात्तत्वं कण्ठपृष्ठ उत्तरपदानां तान्याद्युदात्तानीत्यर्थः सुग्रीव इति यथ

२८ ल॰ शे॰ 28

पियरत्वान्नञ्सुभ्यामुपसर्गान्ताङ्मिश्चवितत्तयापिनीलग्रीवइत्युदाहरणंबोध्यंवेनतुनर्विक
ल्पानात् अर्थेपरस्यापिबाधकइतिहरदत्तः विशेषोऽवस्येतिगम्यतेइतिशेषः औपम्येगोष्ठङ्
इत्युदाहरणंनञोजर नञ्सुभ्यामित्यस्यापवादः जरणंजरः ऋदोरप्मरणंमरः अतएव
निपातनादप्मिदेस्तः मित्रेभूतेनञ्मितिभावेक्तः सत्रेतुशब्दपरत्वात्तुक्तं अमित्रेति अ
येबहुव्रीहावनेनमध्योदात्तः नञ्तत्पुरुषेत्वव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः अमेरि
त्राविशब्दान्तोदात्तोपिमित्रयोपिपुंल्लिङ्गःभृत्यामित्रहत्रमेघः पुंसीत्युक्तेः नचतत्पुरुषेपरव
ल्लिङ्गतापत्तिरितिवाच्यंलिङ्गानुशासनसूत्रेएकशेषेणस्यापिनिर्देशान्नदोषइत्याहुः हर
दत्तस्तुतत्पुरुषेनपुंसकमेवाद्युदात्तत्वमाह एवञ्चाशीतेराष्ट्रकमीणिइत्यत्रणादिसूत्रो
क्तमनोरमादिरीत्याईश्वरीशब्दवदमित्रशब्दोपित्रिप्रकारः सोमेनसी अपवादइतिएव
मन्त्ररत्नत्रयमपितदपवादएवमनत्वासवमनसीसुकर्माणइतियथप्याद्युदात्तेअवृक्ष

न्दसीत्यनेनैव सिद्धमिदन्तथापि अनिनस्मन्ग्रहणानीति न्यायेन सुपथिमित्यादिवद्धजर्थम छन्दो
र्थेञ्ज्वेदमस्त्वादित्यत्रापि सरेकर्मण्येव हिरण्मयात्पूर्वेत्रासिद्धत्वाहादतस्यासिद्धत्वेनासन्नत्वादयं स्वरो
भवत्यवयतत्व स्वादिषुदत्तेसिद्धमिति तत्रसौदीर्घत्वेइतिवाकारशेषात् दीर्घविधायवेव सहलो
मेत्यादौनन्त्स्वभ्यामिति भवति कृतादयश्च कृतत्रटशीक प्रतीक प्रतूर्ति हव्य भव्य भग
इतिकृतादयः आद्युदात्तेद्याव् बहुव्रीहावाद्युदात्तमिति आद्युदात्तमेवेत्यर्थः सोः किंग्र
ण्यः स्वबाहुरितिकृत्प्रत्ययान्तोदात्तः हिरण्यशब्दइतिकन्यनन्तोयंवीरवीर्यौ वीरोरक्प्रत्य
यान्तः आद्युदात्तत्वंनेतिच्छन्दसिनेतिन्नाप्यतेइत्यर्थः तेनभाषायांभवत्येव तथावच्छन्द
सिवीर्यशब्दस्तित्स्वरेणान्तस्वरितइतिभावः विल्वभद्रवीर्याणिच्छन्दसीतिफिट्सूत्रन्त
